## ढे लोपोऽकद्र्वाः । (१४७/११४२)

ढे परतः उवर्णान्तस्य[1] भस्य [2]अकद्र्वाः लोपो भवति । कामण्डलेयः । शैतबाहेयः । जाम्बेयः । माद्रबाहेयः । अकद्र्वाः इति किम् ? काद्रवेयो मन्त्रमपश्यत्[3] ॥

## यस्येति च । (१४८/३११)

[4]इवर्णान्तस्य अवर्णान्तस्य च भस्य इकारे [5]परे तद्धिते च लोपो भवति । इवर्णान्तस्य [6]ईकारे – दाक्षी । प्लाक्षी । सखी । सवर्णदीर्घत्वे हि सति अतिसखेरागच्छति इत्यत्र एकादेशस्या[7]न्तवत्त्वादसखि (१.४.७/२४३) इति [8]घिसञ्ज्ञायाः प्रतिषेधः स्यात् । इवर्णान्तस्य तद्धिते – दुलि – दौलेयः । बलि – बालेयः । अत्रि – आत्रेयः । अवर्णान्तस्य ईकारे – कुमारी । गौरी । शार्ङ्गरवी[9] । [10]अवर्णान्तस्य तद्धिते – दाक्षिः । प्लाक्षिः । [11]चौडिः । बालाकिः । सौमित्रिः ।

[८०४] [12]यस्येत्यौङः [13]श्यां प्रतिषेधो वक्तव्यः । (म. भा. ३. २२७)

काण्डे । [14]कुड्ये । सौर्ये हिमवतः शृङ्गे । औङः शीभावे कृते 'यस्येति च' इति, 'सूर्यतिष्यागस्त्य-मत्स्यानां य उपधायाः' (६. ४. १४९/४९९) इति च लोपः प्राप्नोति ।

[८०५] इयङुवङ्भ्यां लोपो भवति विप्रतिषेधेन । (म. भा. ३. २२७)

वत्सान् प्रीणाति वत्सप्रीः[15], तस्य अपत्यम् वात्सप्रेयः । 'चतुष्पाद्भ्यो ढञ्' (४. १. १३५/११४१) इति [16]ढञ्प्रत्ययः । लेखाभ्रूः [17]शुभ्रादिः, तस्याः अपत्यम् लैखाभ्रेयः ॥

## सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः । (१४९/४९९)

सूर्य तिष्य अगस्त्य मत्स्य इत्येतेषां यकारस्य उपधायाः भस्य लोपो भवति [18]ईति परतस्तद्धिते च । सूर्येणैकदिक्[19] सौरी बलाका । अणि यो यस्येति लोपः तस्यासिद्धत्वं नास्ति, व्याश्रयत्वात् । ईकारे तु यस्तस्या-सिद्धत्वाद् उपधायकारो भस्याणन्तस्य सूर्यस्य सम्बन्धी इति लुप्यते । तिष्य–तैषमहः । तैषी रात्रिः । अगस्त्य–अगस्त्यस्यापत्यं स्त्री, [20]ऋषित्वादणि कृते आगस्ती । आगस्तीयः । [21]मत्स्य – गौरादित्वात् ङीष्, मत्सी । उपधायाः इति किम् ? मत्स्यचरी । यग्रहणमुत्तरार्थम् । विषयपरिगणनमत्र कर्तव्यम् ।

---

1. अङ्गस्य इत्यधिकम् फ. 2. कद्रूशब्दं वर्जयित्वा फ. 3. स्त्रीभ्यो ढक् इत्यधिकम् ह. 4. इवर्णो-
वर्णयोः फ. 5. प्रत्यये परतः फ, परे नास्ति ड. 6. ईकारे नास्ति फ. 7. अन्तवत्त्वे सति फ. ह. 8. घिसञ्ज्ञा-
प्रतिषेधः फ. क. 9. किशोरी इत्यधिकम् ह. 10. अवर्णान्तस्य नास्ति फ. 11. चौलिः फ. 12. यस्येति नास्ति
फ. 13. परे इत्यधिकम् फ. ह, इत्यादौ प्रतिषेधो वक्तव्यः क. 14. कुण्डे फ. 15. गौः इत्यधिकम् ड. फ. ह.
16. ढञ्प्रत्ययः नास्ति फ. 17. शुभ्रादिः नास्ति फ. 18. ईति ईकारप्रत्यये भसञ्ज्ञानिमित्ते तद्धिते परतः फ.
19. बलाका इत्यधिकम् ह. 20. ऋषित्वादणि कृते नास्ति ह. 21. मत्स्य नास्ति फ.